## यूनस्तिः । (७७/८३१)

युवन्शब्दात् प्रातिपदिकात् स्त्रियां तिः प्रत्ययो भवति । स च तद्धितसञ्ज्ञो भवति । ङीपोऽपवादः । युवतिः ॥

## अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे । (७८/११९८)

गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोः[1] प्रातिपदिकयोर्गुरूपोत्तमयोः स्त्रियां ष्यङ आदेशो भवति । 'निर्दिश्यमानस्यादेशा भवन्ति' (व्या.प. १०६) इत्यणिञोरेव[2] विज्ञायते, न तु समुदायस्य । ङकारः [3]सामान्यग्रहणार्थः । षकारस्तदविघातार्थः, 'यङश्चाप्' (४.१.७४/५२८) इति । उत्तमशब्दः स्वभावात् त्रिप्रभृतीना-[4]मन्त्यमक्षरमाह । उत्तमस्य समीपम् उपोत्तमम् । गुरु उपोत्तमं यस्य तद् गुरूपोत्तमं प्रातिपदिकम् । करीषस्येव गन्धोऽस्य करीषगन्धिः । [5]कुमुदगन्धिः । 'तस्यापत्यम्' (४.१.९२/१०८८) इत्यण् । तस्य ष्यङ आदेशः । कारीषगन्ध्या । कौमुदगन्ध्या । [6]वराहस्यापत्यम् । 'अत इञ्' (४.१.९५/१०९५) । वाराहिः । तस्य ष्यङ आदेशः । वाराह्या । बालाक्या । अणिञोः इति किम् ? [7]ऋतभागस्यापत्यं, बिदादित्वादञ्, [8]आर्तभागी । [9]गुरूपोत्तमादिकं सर्वमस्ति इति न त्वणिञौ । [10]टिड्ढाणञ् (४.१.१५/४७०) इति ङीबेव भवति । अनार्षयोः इति किम् ? वासिष्ठी । वैश्वामित्री । गुरूपोत्तमयोः इति किम् ? औपगवी । कापटवी । गोत्रे इति किम् ? [11]तत्र जाताः (४.३.२५/१३९३)–आहिच्छत्री । कान्यकुब्जी ॥

## गोत्रावयवात् । (७९/११९९)

अणिञोः इत्येव । गोत्रावयवाः [12]गोत्राभिमताः कुलाख्याः पुणिक[13]भुणिकमुखरप्रभृतयः । ततो गोत्रे विहितयोरणिञोः [14]स्त्रियां ष्यङ आदेशो भवति । अगुरूपोत्तमार्थ आरम्भः । पौणिक्या । [15]भौणिक्या । मौखर्या । [16]येषां त्वनन्तरापत्येऽपि [17]इष्यते दैवदत्त्या, याज्ञदत्त्या इति, ते क्रौड्यादिषु द्रष्टव्याः ॥

## क्रौड्यादिभ्यश्च । (८०/१२००)

क्रौडि इत्येवमादिभ्यश्च स्त्रियां [18]ष्यङ प्रत्ययो भवति । अगुरूपोत्तमार्थ आरम्भः । अनणिञर्थश्च । क्रौड्या । लाड्या[19] ।

क्रौडि । लाडि । व्याडि । आपिशलि । [20]आपक्षिति । [21]चौपयत । [22]चैटयत । शैकयत । बैल्वयत । वैकल्पयत । सौधातकि । 'सूत युवत्याम्' (ग.सू. ५८) । 'भोज क्षत्रिये' (ग. सू. ५९) भौरिकि । [23]भौलिकि । [24]शाल्मकि । [25]शालास्थलि । कापिष्ठलि । गौलक्ष्य । गौकक्ष्य ॥

---

1. अनृषिवाचकयोः इत्यधिकम् इ. 2. आदेशो इत्यधिकम् क.ड. 3. समानग्रहणार्थः क. 4. अन्त्यमाह ब. 5. नास्ति फ, कुमुदस्येव गन्धः यस्य इत्यधिकम् इ.क.ड, कौमुदगन्धिः क. 6. वाराहस्य क. 7. ऋतभगस्य इ. 8. आर्तभागः इ. 9. गुरूपोत्तमादिः ब. 10. 'शार्ङ्गरवाद्यञो ङीन्' इति ङीनेव भवति न्या.पं.म. । 11. तत्र जाता नास्ति फ. 12. अप्रधान इत्यधिकम् ड. 13. हुणिक ह. 14. स्त्रियां नास्ति फ. 15. भौणिक्याः द्रष्टव्याः फ, हौणिक्या क. 16. ये तु ह. 17. इष्यन्ते ह. 18. ष्यन् ह. 19. लौड्या फ. 20. अविक्षिति फ, अपिक्षति ब, अपक्षिति ह. 21. चौषयत वौपयत चैकयत क. 22. दैगयत सैकयत फ, वैटयत सैकयत वैकल्यवत ब.ड, वैकलयत इ. 23. भौलिकि नास्ति ह. 24. शालालि ड. 25. शालास्थलिका फ.